Gyanshauryam, International Scientific Refereed Research Journal
© 2022 GISRRJ | Volume 5 | Issue 5 | ISSN : 2582-0095

# वेदाङ्गेषु शिक्षा

गौरी राठौर
शोधच्छात्रा, संस्कृतविभागः, गुरुकुल कांगड़ी (समविश्वविद्यालयः) हरिद्वारः।

**Article Info**
Volume 5, Issue 5
Page Number : 33-36
**Publication Issue :**
September-October-2022
**Article History**
Accepted : 03 Sep 2022
Published : 20 Sep 2022

**शोधसारांशः–** मानवजीवने वर्णानामुच्चारणमतिमहत्वं भजते। अतः शिक्षावेदाङ्गं माधुर्य्यादिभिः गुणैर्युतस्योच्चारणस्य विधानं कुरुते। वेदाङ्गेषु यदि शिक्षावेदाङ्गं नाभविष्यच्चेदमुष्याभावे वर्णानामशुद्धस्योच्चारणस्य प्रचलनं परितः दरीदृश्येत्। वर्त्मनि वर्णानां शुद्धोच्चारणाय तेषां स्थानकरणप्रयत्नादीनाञ्च ज्ञानाय शिक्षावेदाङ्गस्य महती आवश्यकतानुभूयते। भाषाविज्ञानं यस्य ध्वनिविज्ञानस्य प्रतिपादनं कुरुते तस्य मूले शिक्षावेदाङ्गमेव विद्यते।यदि शिक्षावेदाङ्गं भाषाविज्ञानञ्चोभयमपि परस्परं सम्मिल्य जिज्ञासूनां मार्गदर्शनं कुर्यातां तर्हि समाजस्य बहूनि श्रेयांसि हितानि च विधास्यतः।वेदार्थे उदात्तादिस्वराणां बहुमहत्त्वं वर्त्तते। एषां स्वराणामुच्चारणविधयः शनैश्शनैः विद्वत्समाजे लुप्यन्ते । शिक्षावेदाङ्गस्य माध्यमेन अस्याः स्वरलोपस्य समस्यायाः समाधानं प्राप्तुं शक्यत इति।

**मुख्यपदानि–** वेदाङ्गः, शिक्षा, श्रेयांसि, उच्चारणः,कल्पः, व्याकरण, छन्दः, निरुक्तः, ज्योतिषः।

जगतीतलेऽस्मिन् वेदानां महत्त्वं तु प्रथितमेव। त्रिविधतापपीडितः सांसरिको जनो यथा तृषितः शीतलसलिलेन शान्तिमधिगच्छति तथैव वेदाज्ञानामृतेन। इदमेव कारणमस्ति यद् अस्माकं पूर्वजाः रक्षणार्थं ज्ञानार्थं च सर्वतोभावेन प्रयत्नं चक्रुः। तेषां अर्थावबोधाय विनियोगाय प्रयोगाय स्वरूपपरिज्ञानाय च तेवेदाङ्गानि विरचयामासुः। वेदार्थज्ञानोपयोगीनि साधनान्येव वेदाङ्गानि निगद्यते। तानि च षट् शिक्षा, कल्प, व्याकरण, निरुक्त, छन्दः, ज्योतषञ्चेति। पाणिनीयशिक्षायां कथितमप्यस्ति –**शिक्षा व्याकरणं छन्दो निरुक्तं ज्योतिषं तथा।**
**कल्पश्चेति षड्ङ्गानि वेदस्याहुर्मनीषिणः ।।**[1]

वेदाध्ययनस्य कृते एतेषां महत्त्वमेवं प्रतिपादितमस्ति –

**"छन्दःपादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात् साङ्मधीत्यैव ब्रह्मलोके महीयते**[2]**।।"**

भगवान् पतञ्जलिरपि कथयति यद् वेदानामध्ययनं शिक्षाव्याकरणनिरुक्तछन्दाज्योतिषकल्पाख्यैः षड्भिरङ्गैः सह कर्तव्यम्-**ब्राह्मणेननिष्कारणो धर्मो षडङ्गो वेदोऽध्येयो ज्ञेयो ज्ञेयश्च**[3]**।"** वेदानामर्थविनियोगस्वरूपावबोधाय कारणत्वात् तेषामुपकारत्वं सुस्पष्टमेव। एवमेतेषमहत्त्वं स्फुटमस्ति । तदत्रशिक्षायाः स्वरूपं प्रस्तूयते–

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**शिक्षा-**शिक्षा वेदपुरुषस्य षट्स्वङ्गेष्वन्यतमं स्थानं भजते।अमुष्याः शिक्षायाः सम्बन्धः वर्णैस्तेषाञ्चोच्चारणेन निश्चीयते।वेदानांशुद्धं सुस्पष्टमुच्चारणं भवितव्यम्। अशुद्धोच्चारणयुक्तः वेदपाठः महद् दुष्फलं तनोतिं। शिक्षायां स्वरवर्णाद्युच्चारणप्रकारः संशिक्ष्यते। यथोक्तं सायणेन –

**'स्वरवर्णाद्युच्चारणप्रकारोयत्र शिक्ष्यते उपदिश्यते सा शिक्षेति।'**[4]

शिक्षावेदाङ्गेऽकारादीनां वर्णानामुपदेशो विहितः। वर्णमालाया उपदेशादृते वेदाध्ययनं नैव सम्भाव्यते। वर्णस्तावद्द्विविधः स्वरभेदाद्व्यञ्जनभेदाच्चेति। शिक्षाग्रन्थेष्वेषां विवेचनं विस्तरेण लभ्यते। धारणेयं वेदादेव सङ्गृहीता वर्त्तते।

यथा–**गायत्रेण प्रति मिमीतेऽर्कमर्केण साम त्रैष्टुभेन वाकम्।**

**वाकेन वाकं द्विपदा चतुष्पदाक्षरेण मिमते सप्त वाणी।**[5]**(अथर्ववेद)**

मन्त्रेऽस्मिन् पदेन चतुष्पदेन सह अक्षरदस्याऽपि प्रयोगो दृश्यते।

प्रयोगोऽयं वर्णानां सूचकः विद्यते। सप्तविधा छन्दोमयी मन्त्रात्मिका वाण्यक्षरैः परिगणय्य निर्मिता।

पुनरथर्ववेदे निगदितम्**– ऋचः पदमात्रया कल्पयन्तः।**[6]**(अथर्व ६/६)**

अर्थात्– ऋचां पदानि मात्रया कल्पयन्तः।शिक्षयेह वेदाङ्गसम्बद्धानां वर्णस्वरमात्राबलसामसन्तानाञ्च षड्विषयाणां निर्देशःकृतः। वर्णमालायां त्रिषष्टिश्चतुष्षष्टिर्वा वर्णाः विद्यन्ते। अतः वेदपुरुषस्याङ्गेषु वेदाङ्गेषु शिक्षाङ्गं प्रथमतया स्वं महत्वं भजते। अमुष्य शिक्षानाम्नोऽङ्गस्यैतिह्यमत्यन्तं प्राचीनं वर्त्तते। शिक्षावेदाङ्गस्य तत्वानि प्राचीनेषु ग्रन्थेषूपलभ्यन्ते।

गोपथब्राह्मणे ह्यवलोकयितुं शक्यते–**ओंकारं पृच्छामः।**[7]**(गो.ब्रा.२/२४/१२)**

इह गोपथब्राह्मणे शिक्षायाः विषयस्थानानुप्रदानकरणानाञ्च चर्चा परिचर्चिता । ब्राह्मणेऽस्मिन् शिक्षावेदाङ्गस्य वेत्तारः शिक्षका इति प्रख्यापिताः।गोपथब्राह्मणे वेदानां षडङ्गानि षडङ्ग इति नाम्ना निर्दिष्टानि। येषाञ्च वेदाङ्गानां प्रथमस्य शिक्षावेदाङ्गस्योद्भवः ब्राह्मणकालेऽभूदिति निर्णीतः।मुण्डकोपनिषदि अपराविद्यायाः व्याख्यायां चतुर्णामपि वेदानां नामानि निर्देशपूर्वकमुल्लिखन् वेदानां षडङ्गानि निर्दिष्टानि–**तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदो शिक्षा कल्पो व्याकरणम्।**[8]तैत्तिरियोपनिषदः प्रथमाध्यायस्याभिधानमेव शिक्षाध्यायइति वर्त्तते।शीक्षां व्याख्यास्यामः–**वर्णः स्वरः मात्रा बलं साम संतान इत्युक्तः शीक्षाध्यायः**[9]।इह शिक्षापदे दीर्घकारःपठितः। सम्भाव्यते यत् प्राक्काले दीर्घकारस्य प्रचलनमभविष्यत् किन्त्वेवंविधः पाठोऽन्यत्र कुत्रचिन्न द्रष्टुं लभते।

निरुक्त आचार्यो यास्कः ब्रवीति–**साक्षात्कृतधर्माण ऋषयो बभूवुरिति।। तेऽवरेभ्योऽसाक्षात्कृतधर्मेभ्य उपदेशेन मन्त्रान् सम्प्रादुः । उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं मकाम्नासिषुर्वेदं च वेदाङ्गानि च ।**[10]

प्राचीने काले हि वेदधर्मस्य साक्षात्कर्त्तारः बहव ऋषयोऽभूवन्। ते च ऋषयः वेदधर्मज्ञानरहितेभ्यस्साधारणेभ्यो मनुष्येभ्यः मन्त्राण्युपदिशन्ति स्म। यदा साधारणमनुष्याः मन्त्रोपदेशं प्रत्युदासीना अभवन् तदा वेदस्य ज्ञानं ग्रहीतुं ग्राहयितुञ्चास्य निरुक्तशास्त्रस्य प्रणयनं जातमित्थमेव शिक्षादीनामितरेषामपि वेदाङ्गानां रचना सञ्जाता ।

निरुक्ते यास्काचार्यःशिक्षावेदाङ्गं नामनिर्देशपूर्वकं तु नाह परं वेदाङ्गानि पदमत्यन्तं महत्वपूर्णमस्ति। पदेनानेनासावाचार्यः शिक्षादीनि षड्वेदाङ्गानि सङ्केतयति। व्याकरणमहाभाष्ये पतञ्जलिराह– ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति। पतञ्जलिरत्र महाभाष्ये नः षडङ्गसहितान् चतुरोऽपि वेदानध्येतुमुपदिशति ।

शिक्षावेदाङ्गे मुख्यतया उच्चारणविधिरेव वर्त्तते। तैत्तिरीयोपनिषदीदमन्यदपि स्पष्टीकृतम्– शीक्षां व्याख्यास्यामः–वर्णः स्वरःमात्रा बलं साम सन्तान इत्युक्तःशीक्षाध्यायः।शिक्षाग्रन्थेऽमीषां षडङ्गानां विवेचनं प्राप्यते –

(१) वर्णः– अ इ उ क् ख् इत्यादीनां वर्णानामुच्चारणम्।
(२)स्वरः– वेदपाठे प्रयुक्तानामुदात्तानुदातस्वरितानामुच्चारणम्।
(३)मात्रा– ह्रस्वदीर्घप्लुतानामुच्चारणम्।
(४) बल– स्थानप्रयत्नानुसारं वर्णानामुच्चारणम्।
(५) साम–दोषराहित्यं माधुर्यादिगुणसमन्वितमुच्चारणम्।
(६) सन्तान– सन्ध्यनुगुणमुच्चारणम्।

पाणिनीयशिक्षायां वर्णानां सङ्ख्या विज्ञापिता–

**त्रिषष्टिश्चतुष्षष्टिर्वा वर्णाः शम्भुमते मताः।**
**प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा।[11](पा.शि.३)**

अतः वक्तुमिदं शक्यते यत् प्राकृतभाषायां संस्कृतभाषायाञ्च वर्णानां सङ्ख्या त्रिषष्टिः चतुष्षष्टिर्वा विद्यते।अस्य महर्षिः पाणिनिरेवं व्याख्यां कुरुते–वर्णाः–अकारादिः,स्वराः उदात्तानुदात्तस्वरिताः मात्राः ह्रस्वदीर्घप्लुताः बलम्–स्थान दृप्रयत्नौ,साम–साम्येन विधिना वर्णोच्चारणम्, सन्तानः–संहितापाठमनुसृत्य सन्धिनियमानुकुलपदप्रयोगः। पाणिनीयशिक्षायां पाठकानां षड्गुणाःवर्णिताः सन्ति

**माधुर्यमक्षरव्यक्तिःपदच्छेदस्तुसुस्वरः।**
**धैर्यं लयसमर्थं च षडेते पाठका गुणाः ।।[12]**

शिक्षया वर्णानामुच्चारणं शुद्धं जायते। शुद्धोच्चारणेन पुण्यावाप्तिः,अशुद्धोच्चारणेन च पापावाप्तिः।श्रुयते यत् पुरा केनचिद्पण्डितेन 'इन्द्रशुत्रुर्वर्धस्व' इत्येतस्य मन्त्रस्य अशुद्धोच्चारणं कृतम्, तेन यजमानस्यानिष्टमभूत्। पाणिनीयशिक्षायां कथितमस्ति-

**मन्त्रो हीनः स्वरतो वर्णतो वा,मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्,।।**[13]शिक्षाग्रन्थेषु पाणिनीयशिक्षा प्रमुखमस्ति।अन्ये शिक्षाग्रन्थाः–याज्ञवल्क्यशिक्षा,व्यासशिक्षा,नारदशिक्षा,माण्डूकीशिक्षा चेति।वर्णसङ्ख्येयं भगवतो शम्भोः मते आधारितास्ति। पाणिनीये सम्प्रदाये भगवान् महेश्वरः पाणिनेः दीक्षागुरुरिति ख्यातः।असौ महेश्वरः ढक्कानिनादेन माहेश्वरसूत्राणाम्माध्यमेन च महर्षिपाणिने वर्णानां ज्ञानमकारयत्–

**नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।**
**उद्धर्त्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्।।[12]**

शिक्षावेदाङ्गे त्रिविधाः रचनाः लभन्ते–

(१) प्रातिशाख्यानि।
(२) शिक्षाग्रन्थाः।
(३)शिक्षासूत्राणि।

प्रातिशाख्यग्रन्थाः– इमे सर्वप्राचीनाः ग्रन्थाः सन्ति। वेदस्य प्रत्येकं शाखायाः स्वीयः प्रातिशाख्यः वर्त्तते। प्रत्येकं शाखायाः सम्बन्धित्वादेवेमे प्रातिशाख्याः कथ्यन्ते। प्रतिशाखायां वेदमन्त्राणामुच्चारणविधयः भिन्नाः सन्ति ।

**प्रातिशाख्यग्रन्थानां विषयाः–**

(१)वर्णसमाम्नायः– स्वरव्यञ्जनादीनां वर्णानां परिगणनं तेषाञ्चोच्चारणनियमानां स्पष्टीकरणम्।

(२) सन्धिः– द्वयोर्वर्णयोर्सम्मिलिते सति भाव्यपरिवर्त्तनानां विवेचनम्।
(३) प्रगृह्यसंज्ञा– पदविभागस्य नियमानां स्पष्टीकरणमपवादनियमानाञ्च ज्ञापनम्।
(४) उदात्तानुदात्तशब्दानां सङ्गणनं स्वरितभेदस्य ज्ञापनमाख्यातस्वरस्य च स्पष्टीकरणम्।
(५) संहितापाठे पदपाठे च भेदं दर्शयतां नियमानां व्याख्यानं सत्वषत्वयोः दीर्घस्य च विवरणम्।
(६) विभिन्नेषु प्रातिशाख्येषु विभिन्नाः पाठाः।
(७) सामप्रातिशाख्ये विभिन्नरीतीनां वर्णनम् तद्यथा- प्रश्लेषविश्लेषकृष्टाकृष्टसङ्कृष्टाद्युच्चारणभेदानां वर्णनम्।
सम्प्रति लभ्यमानाः प्रातिशाख्यग्रन्थाः–
(१)ऋग्वेदः–ऋक्प्रातिशाख्यम्।
(२)शुक्लयजुर्वेदः– वाजसनेयिप्रातिशाख्यम्।
(३)कृष्णयजुर्वेदः– तैत्तिरीयप्रातिशाख्यम्।
(४) सामवेदः–१– पुष्पसूत्रप्रातिशाख्यम् ।
२– ऋक्तन्त्रप्रातिशाख्यम्।
(५)अथर्ववेदः– १–अथर्ववेदप्रातिशाख्यसूत्रम्
२–शौनकीय चतुरध्यायिका।
प्रातिशाख्यग्रन्थाःव्याकरणस्य आदिमाःग्रन्थाःमन्यन्ते। यद्यपि प्रातिशाख्यानि स्वतः व्याकरणग्रन्थाः न विद्यन्ते तथापि तेषु व्याकरणस्य मूलसिद्धान्ताः स्थापितास्सन्ति।
शिक्षाग्रन्थाः– प्रातिशाख्यान्याधृत्य शिक्षाग्रन्थानां निर्मितिरभवत्।शिक्षाग्रन्थेषु शुद्धोच्चारणस्य महत्वं शुद्धोच्चारणनियमाः पाठकस्य गुणदोषाश्च विवेचिताः।

## सन्दर्भसूची–


1. वैदिकसाहित्य का इतिहास;कपिलद्विवेदीद्धपृष्ट सं.–190
2. पाणिनीयशिक्षा श्लोक सं –41.42
3. व्याकरणमहाभाष्य पृष्ट सं.24
4. ऋग्वेदादिभाष्यभूमिका.49
5. अथर्ववेद .9.8.2
6. अथर्ववेद 9७9
7. गोपथब्राह्मण 2७24७12
8. मुण्डकोपनिषद .1७1७5
9. तैत्तिरीयोपनिषद.1७2
10. निरुक्त(हरीशप्रकाशन) पृष्ट सं. 90
11. पाणिनीयशिक्षा श्लोक सं ७3
12. पाणिनीयशिक्षा
13. पाणिनीयशिक्षा श्लोक सं७33
14. पाणीनीय शिक्षा श्लोक सं७52